अङ्क-२४
जुलाई-दिसम्बर २०१४

**वेदविद्या**
ISSN-2230-8962

# धर्मसूत्रेषु धर्मतत्त्वानुशीलनम्

**डॉ. जे.एन. त्रिपाठी**

**'कल्पो वेदविहितानां कर्मणामानुपूर्व्येण कल्पनाशास्त्रम्'** इति कृत्वा षड्सु वेदाङ्गेषु कल्पसूत्राणां सर्वाधिकं महत्त्वम्। कुमारिलेनापि कथितम् -

**वेदादृतेऽपि कुर्वन्ति कल्पैः कर्माणि याज्ञिकाः।**
**न तु कल्पैर्विना केचिन्मन्त्रब्राह्मणमात्रकात्॥**

तत्रापि चतुर्धा विभक्तेषु कल्पसूत्रेषु धर्मसूत्राणि अतिमहत्त्वाधायकानि। धर्मः तेषां मुख्यः विषयः। को धर्मः ? इति प्रश्नः प्राचीनतः अद्यापि विमर्शयोग्यः वर्तते एव। यस्य संस्थापनार्थं प्रतियुगम् ईश्वरः अवतरति-**'धर्म संस्थापनार्थाय सम्भवामि युगे-युगे।'** **'ध्रियते लोकोऽनेन'; 'धरति लोकं वा'**[1] इति व्युत्पत्तिं कृत्वा आप्टेमहोदयेन अस्य नैके अर्थाः कृताः। **'यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्'**[2] अनेन ऋग्वेदीयमन्त्रानुसारेण यज्ञपुरुषस्य यजनानन्तरं यज्ञेन सर्वप्रथमं धर्माणि उत्पन्नानि। येषां विहिताचरणाः देवाः महिमावन्तः स्वर्गवासिनः अभवन्। 'धर्मन्' शब्दस्य प्रयोगः सर्वप्रथमं ऋग्वेदे प्राप्यते। अनन्तरं वाजसनेयिसंहितायाम् अथर्ववेदे चास्य प्रयोगः अनेकशः अभवत्। एतेषु प्रयोगेषु धर्मशब्दस्यार्थ अस्ति-धार्मिकविधिः, धार्मिकक्रिया, शाश्वतनियमः आचरणनियमाश्चेति। संहितोत्तर-वर्तिकाले एष शब्दार्थः वर्णाश्रमाणां विधिसमीपमागतः। उपनिषत्काले धर्मस्यार्थः वर्णानाम् आश्रमाणामाचारः संस्कार एवासीत् - **'त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति।'**- छान्दोग्योपनिषद्।

धर्मस्यः नैकाः परिभाषाः प्रचलिताः। यथा पूर्वमीमांसासूत्रे **'चोदनालक्षणोऽर्थो धर्मः'**।[3] अर्थात् वेदविहितः कर्मप्रेरकः विधिनियमो धर्मः। वैशेषिकसूत्रे **'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः**[4]। मनुस्मृतौ **'श्रुतिप्रमाणको धर्मः'**, वसिष्ठधर्मसूत्रे **'श्रुतिस्मृतिविहितो धर्मः'**[5]। अनेन स्पष्टं यत् भारतीयधर्मस्य मूलं वेदाः स्मृतयः एव सन्ति। तदनुसारं विहितनियमः आचार एव धर्म इति। गौतमधर्मसूत्रेण स्पष्टं लिखितम्- **'वेदो धर्ममूलम्, तद्विदां च स्मृतिशीले'**। आपस्तम्बानुसारमपि

---

[1] सं.हि.कोशः आप्टे; पृ. ४८९
[2] ऋग्वेदः पुरुषसूक्तम् १.१६४.५०; १०.९०.१६
[3] पूर्वमीमांसासूत्रम् जैमिनिः १.१.२
[4] मनुस्मृतिः २/६
[5] वसिष्ठधर्मसूत्रम् १/४/६

धर्मज्ञानां वेदज्ञानां मतमेव वेदस्य प्रमाणम् - **'धर्मज्ञसमयः प्रमाणं वेदाश्च'**[६] । याज्ञवल्क्यस्मृतौ उपर्युक्तैस्सह समुचितेन सङ्कल्पेनोत्पन्नेच्छापि धर्मस्य मूलमिति वर्णिता -

**श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।**
**सम्यक् सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम् ॥ याज्ञ. १/७**

बौधायनधर्मसूत्रे धर्मस्य स्रोतत्रयमुल्लिखितम् - उपदिष्टो धर्मः प्रतिवेदम्, स्मार्तो द्वितीयः, तृतीयः शिष्टागमः।[७] एतेषु प्रत्यक्षश्रुतिविहितो धर्मः प्रथमो धर्मः । द्वितीयः स्मार्तः धर्मः पञ्चविधः भवति - वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमित्तधर्मश्चेति । जातिमात्रोद्देशेन विधीयमानो धर्मः वर्णधर्मः, ब्रह्मचर्याद्याश्रमोद्देशेन विधीयमानो धर्मः आश्रमधर्मः, वर्णगताश्रमोद्देशेन व्यवस्थया विधीयमानो धर्मः वर्णाश्रमधर्मः[८] । गुणं कञ्चनोपादाय तदवलम्बेन विधीयमानो धर्मः गुणधर्मः, निमित्तमुपादाय विधीयमानो निमित्तधर्मः । विज्ञानेश्वरस्तु पञ्चभिरेभिस्साकं साधारणधर्मं कञ्चनोपादाय धर्मस्य षड्विधमाह । सः विहिताकरणप्रतिषिद्धसेवननिमित्तं प्रायश्चित्तमिति निमित्तधर्मं व्याख्याय साधारणधर्मः अहिंसादिः इत्युक्तवान्।[९] शिष्टैराचरितः तृतीयः । शिष्टाः खलु विगतमत्सराः निरहङ्काराः कुम्भीधान्या अलोलुपा दम्भदर्पलोभमोहक्रोधविवर्जिताः । शिष्टाभावे दशावरा परिषद् यद्वदति सोऽनुष्ठेयः। दशावराविषयेऽस्मिन् बौधायनेन लिखितम् -

**चातुर्वैद्यं विकल्पी च अङ्गविद्धर्मपाठकः ।**
**आश्रमस्थास्त्रयो विप्राः पर्षदेषा दशावरा ॥ बौधायनधर्मसूत्रम् १/८**

एवं धर्मसूत्रेषु धर्मस्य यत्स्वरूपं परिलक्ष्यते तत् केनापि शब्दविशेषेण व्यक्तीकरणमशक्यम् । अनेन ईश्वरं प्रति आस्थायाः सदाचरणस्य सामाजिकानां वैयक्तिकनियमानां कर्तव्यानाञ्च सर्वेषां समाहारः धर्मेण भवति । जानमेकजींमहोदयेन 'रिलीजन', 'वर्च्यु', 'ला', 'ड्यूटी' इत्येतेषु चतुर्ष्वर्थेषु कृतः धर्मस्य प्रयोगः सर्वथा प्रतिभाति।[१०] मैक्समूलरेणापि सम्यक् निगदितं यत् भारतवासिनां कृते धर्मान्तर्गतं केवलं पूजा-प्रार्थना एव न आयाति अपितु तत्सर्वमायाति यद् वयं दर्शनं, नीतितत्त्वं शासनमिति कथयामः । समग्रं जीवनं तेभ्यः धर्म आसीत्, अन्यत्सर्वं वस्तु अस्य जीवनस्य भौतिकावश्यकतार्थं निमित्तमात्रमेव[११]। मन्ये **'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज'** इत्युक्त्या श्रीकृष्णेन स एवार्थः सङ्केतितः ।

---

६ आपस्तम्बधर्मसूत्रम् १/१/१-२
७ बौधायनधर्मसूत्रम् १/१/१-४
८ तदेव पृ. २
९ मनुस्मृतिः मिताक्षरा १/१
१० बौधायनधर्मसूत्रम् भूमिकाभागः, पृ. १६
११ ह्वाट कैन इण्डिया टीच अस, पृ. १०७

हिन्दुधर्मस्य वैशिष्ट्यं यत्सः जीवनस्य सर्वान् पक्षान् समन्वितरूपेण पश्यति । चतुर्णां पुरुषार्थानां कल्पना मानवजीवने सर्वेषु पक्षेषु समन्वयस्य आदर्शरूपेणावतिष्ठते । **'मत्वा कर्माणि सीव्यन्ति इति मनुष्याः'** अनया यास्कीयया व्युत्पत्त्या धर्मः मनुष्येण पृथक् नास्ति । अपि तु धर्मेण एव मनुष्यः मनुष्यरूपेण कल्पते । अनेन विना सः पशुतुल्यो भवति । कथितमपि - **'धर्मेण हीनाः पशुभिः समानाः'**। धर्मसूत्रेषु मानवजीवनस्य सर्वासामवस्थानाम् आचरणविधानं वर्तते । अस्माकं समग्रं जीवनं संस्कारेषु प्रतिबद्धम् । संस्काराः व्यक्तिं कर्त्तव्यान् प्रति प्रेरयन्तः जीवनलक्ष्यं साधयन्ति। जीवने विविधावस्थाभिस्सह समायोजनाय उत्तरोत्तरं लक्ष्यप्राप्तये प्रेरयति आस्माकीना आश्रमव्यवस्था । मानवस्य शक्तयः परिवर्तनशीलाः भवन्ति, तदनुसारं दायित्वे कर्तव्येऽपि परिवर्तनमावश्यकम् । आश्रमव्यवस्था अस्याः आवश्यक्तायाः पूर्तिं करोति । **'धर्मो रक्षति रक्षितः'** इत्यस्याशयः अयमेव यत् धर्मस्य रक्षणेन मानवस्य भौतिकं पारलौकिकं च जीवनं रक्षितं भवति । धर्मविहीनं तत् अस्तं व्यस्तम् उच्छृङ्खलम् उद्देश्यहीनं च सञ्जायते ।

भारतीयधर्मस्य प्रधानं लक्ष्यमिदमेव यत् जीवने एकैकस्य क्षणस्य सदुपयोगो भवेत् । धर्मः जीवनस्य लघुतरायाः समस्यायाः अपि समाधानं विदधाति, मार्गं निर्दिशति, व्यक्तेः स्वातन्त्र्यमपि नापहरति । उदारतया स वदति स्वात्मानं पृच्छ, स यद् वदेत् तत् करोतु । **'स्वस्य च प्रियमात्मनः' 'आत्मनस्तुष्टिरेव च'** इत्यादिवाक्यम् अस्य प्रमाणम् ।

**'आत्मार्थं पृथिवीं त्यजेत्'** इत्यपि आत्मसम्मानं पोषयति ।

वस्तुतः भारतीयधर्मस्य मूलाधारः आचार एव । उक्तमपि-**'आचारहीनं न पुनन्ति वेदाः०'** । धर्मसूत्रेष्वपि आचारः प्रामुख्येन प्रतिपादितः । भारतीयसमाजस्य निर्माणम् आचारेणैव सञ्जातम् । समाजस्य व्यक्तेश्चोन्नतिः आचाररक्षणेनैव सम्भवति । भारतीयसंस्कृतौ यावद् आचारस्य प्राधान्यमासीत् तावत् धर्मः स्वोद्देश्यपूर्तौ सहायकोऽभवत् । यथा यथा तस्य उपेक्षा जाता तथैव अशान्तेः हिंसायाश्च ताण्डवं प्रादुर्भूतम् । इहलोके परलोके च विनाशभाक् भवति आचारविरहितो जनः इति वदति वसिष्ठः -

**आचारः परमो धर्मः सर्वेषामिति निश्चयः ।**
**हीनाचारपरीतात्मा प्रेत्य चेह न नश्यति ॥ वसिष्ठ. ६/१**

धर्मशास्त्रकाराः मानवीयां स्वाभाविकीं पतनोन्मुखीं प्रवृत्तिं सन्नियम्य कल्याणकरं श्रेयस्करं पथं निर्दिशन्ति । **'दृष्टो धर्मव्यतिक्रमः साहसं च महताम्'**[१२] इत्युक्त्वा गौतमेन मानवीया सैव दुर्बलता सङ्केतिता । आचारहीनस्य पितुरपि परित्यागं निर्दिशन् धर्मशास्त्रम् आचारे अधिकं बलं ददाति[१३]।

[१२] गौतमधर्मसूत्रम् १/१/३

[१३] तदेव ३/२/१

जनस्य स्वकर्मणा पतनं जायते । धर्मसूत्रं पातककर्मभिः घृणां करोति, न तु पातकैः । एतदर्थं पापयुक्तैः पातकेभ्यः प्रायश्चित्तस्य विधानं कृतं धर्मसूत्रेण । प्रायश्चित्तानि मनसि पश्चात्तापं समुत्पाद्य जनान् धर्मपथे नियोजयन्ति । एतैः निर्दिष्टा परलोकभीरुतापि जनं समुचितं मार्गं प्रति नयने अद्यावधि सक्षमा वर्तते एव। धर्मोपदेशमात्रमेव नास्ति पर्याप्तम् अपि तु याथार्थ्येन तदाचरणं महत्त्वपूर्णम् । सम्प्रति सर्वत्र प्रतिदिनमधर्माचरणस्य प्रभावः आतङ्कवादरूपेण वा विविधान्दोलनरूपेण वा सर्वैः दृश्यते एव । आचारभ्रष्टस्य वेदशास्त्रादिपारङ्गतस्यापि जनस्य धर्मज्ञानं न हि स्वस्य कृते, न च देशस्य कृते किमपि लाभकरम् । उक्तमपि वसिष्ठेन -

**आचारहीनस्य तु ब्राह्मणस्य वेदाः षडङ्गास्त्वखिलाः सयज्ञा ।**
**कां प्रीतिमुत्पादयितुं समर्था अन्धस्य दारा इव दर्शनीया ॥ - वसिष्ठधर्मसूत्रम् ६.४**

**डॉ. जे.एन. त्रिपाठी**
संस्कृत विभागः
शास. हमीदिया स्नातकोत्तर महाविद्यालयः,
भोपालम् (म.प्र.)